# Sivagitimala or Sivashtapadi

# शिवगीतिमाला अथवा शिवाष्टपदी

## Document Information

Text title : shivagItimAlA

File name : shivagItimAlA.itx

Category : shiva, aShTaka, kRitI

Location : doc_shiva

Author : Shri Chandrashekharendra Saraswati, 62nd Sankaracharya of Kanchi Kamakoti Peetham

Transliterated by : P.R. Kannan prkannanvashi at yahoo.com

Proofread by : P.R. Kannan prkannanvashi at yahoo.com

Description/comments : Praising the pleasurable moments of Lord Ekamreshwarar and Goddess Sri Kamakshi. Siva Gitimala Siva Ashtapadi

Latest update : January 19, 2019

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 29, 2023

*sanskritdocuments.org*

# शिवगीतिमाला अथवा शिवाष्टपदी

श्रीचन्द्रशेखरेन्द्रसरस्वतीविरचिता
Sivagitimala (Sivashtapadi)
by Jagadguru Sri Chandrasekharendra Saraswati
(62nd Sankaracharya of Kanchi Kamakoti Peetham)

## ॥ प्रथमः सर्गः ॥

ध्यानश्लोकाः -
सकलविघ्ननिवर्तक शङ्करप्रियसुत प्रणतार्तिहर प्रभो ॥

मम हृदम्बुजमध्यलसन्मणीरचितमण्डपवासरतो भव ॥ १॥

विधिवदनसरोजावासमाध्वीकधारा
विविधनिगमवृन्दस्तूयमानापदाना ।
समसमयविराजच्चन्द्रकोटिप्रकाशा
मम वदनसरोजे शारदा सन्निधत्ताम् ॥ २॥

यदनुभवसुधोर्मीमाधुरीपारवश्यं
विशदयति मुनीनात्मनस्ताण्डवेन ।
कनकसदसि रम्ये साक्षिणीवीक्ष्यमाणः
प्रदिशतु स सुखं मे सोमरेखावतंसः ॥ ३॥

शर्वाणि पर्वतकुमारि शरण्यपादे
निर्वापयास्मदघसन्ततिमन्तरायम् ।
इच्छामि पङ्गुरिव गाङ्गजलावगाह-
मिच्छामिमां कलयितुं शिवगीतिमालाम् ॥ ४॥

शिवचरणसरोजध्यानयोगामृताब्धौ
जलविहरणवाञ्छासङ्गतं यस्य चेतः ।

निखिलदुरितमभङ्गव्यापृतं वा मनोज्ञं
परशिवचरिताख्यं गानमाकर्णनीयम् ॥ ५॥

॥ प्रथमाष्टपदी ॥

मालवीरागेण आदितालेन गीयते
(प्रलयपयोधिजले इतिवत्)

कनकसभासदने वदने दरहासं
नटसि विधाय सुधाकरभासं
शङ्कर धृततापसरूप जय भवतापहर ॥ १॥

जलधिमथनसमये गरलानलशैलं
वहसि गलस्थमुदित्वरकीलं
शङ्कर धृतनीलगलाख्य जय भवतापहर ॥ २॥

विधुरविरथचरणे निवसन्नवनिरथे
पुरमिषुणा हृतवानितयोधे
शङ्कर वर वीरमहेश जय भवतापहर ॥ ३॥

कुसुमशरासकरं पुरतो विचरन्तं
गिरिश निर्हिंसितवानचिरं तं
शङ्कर मदनारिपदाख्य जय भवतापहर ॥ ४॥

वटतरुतलमहिते निवसन्मणिपीठे
दिशसि परात्मकलामतिगाढे
शङ्कर धृतमौन गभीर जय भवतापहर ॥ ५॥

जलनिधिसेतुतटे जनपावनयोगे
रघुकुलतिलकयशः प्रविभागे
शङ्कर रघुराममहेश जय भवतापहर ॥ ६॥

तनु भृद्वनकृते वरकाशीनगरे
तारकमुपदिशसि स्थलसारे
शङ्कर शिव विश्वमहेश जय भवतापहर ॥ ७॥

निगमरसालतले निरवधिबोधघन
श्रीकामक्षिकुचकलशाङ्कन
शङ्कर सहकारमहेश जय भवतापहर ॥ ८॥

कच्छपतनुहरिणा निस्तुलभक्तियुजा
सन्ततपूजितचरणसरोज
शङ्कर शिव कच्छप लिङ्ग जय भवतापहर ॥ ९॥

शङ्करवरगुरुणा परिपूजितपाद
काञ्चिपुरे विवृताखिलवेद
शङ्कर विधुमौलिमहेश जय भवतापहर ॥ १०॥

श्रीविधुमौलियतेरिदमुदितमुदारं
शृणु करुणाभरणाखिलसारं
शङ्करारुणशैलमहेश जय भवतापहर ॥ ११॥

श्लोकः
कनकसभानटाय हरिनीलगळाय नम-
स्त्रिपुरहराय माररिपवे मुनिमोहभिदे ।
रघुकृतसेतवे विमलकाशिजुषे भवते
निगमरसाल कूर्महरिपूजित चन्द्रधर ॥ ६॥

पापं वारयते परं घटयते कालं पराकुर्वते
मोहं दूरयते मदं शमयते मत्तासुरान् हिंसते ।
मारं मारयते महामुनिगणानानन्दिनः कुर्वते
पार्वत्या सहिताय सर्वनिधये शर्वाय तुभ्यं नमः ॥ ७॥

॥ द्वितीयाष्टपदी ॥

भैरवीरागेण त्रिपुटतालेन गीयते
(श्रितकमलाकुच इतिवत्)
कलिहरचरितविभूषण श्रुतिभाषण
करतलविलसितशूल जय भवतापहर ॥ १॥

दिनमणिनियुतविभासुर विजितासुर
नलिननयनकृतपूज जय भवतापहर ॥ २॥

निर्जितकुसुमशरासन पुरशासन
निटिलतिलकशिखिकील जय भवतापहर ॥ ३॥

पदयुगविनताखण्डल फणिकुण्डल

त्रिभुवनपावन पाद जय भवतापहर ॥ ४॥

अन्धकदानवदारण भवतारण
स्मरतनुभसितविलेप जय भवतापहर ॥ ५॥

हिमकरशकलवतंसक फणिहंसक
गगनधुनीधृतशील जय भवतापहर ॥ ६॥

परमतपोधनभावित सुरसेवित
निखिलभुवनजनपाल जय भवतापहर ॥ ७॥

करिमुखशरभवनन्दन कृतवन्दन
शृणुशशिधरयतिगीतं जय भवतापहर ॥ ८॥

श्लोकः
तुहिनगिरिकुमारी तुङ्गवक्षोजकुम्भ-
स्फुटदृढपरिरम्भश्लिष्ट दिव्याङ्गरागम् ।
उदितमदनखेदस्वेदमंसान्तरं मां
अवतु परशुपाणेर्व्यक्त गाढानुरागम् ॥ ८॥

वासन्तिकाकुसुमकोमलदर्शनीयैः
अङ्गैरनङ्गविहितज्वरपारवश्यात् ।
कम्पातटोपवनसीमनि विभ्रमन्तीं
गौरिमिदं सरसमाह सखी रहस्यम् ॥ ९॥

॥ तृतीयाष्टपदी ॥

वसन्तरागेण आदितालेन गीयते
(ललितलवङ्गलता इतिवत्)
विकसदमलकुसुमानुसमागमशीतलमृदुलसमीरे
अतिकुलकलरवसम्भृतघनमदपरभृतघोषगभीरे
विलसति सुरतरुसदसि निशान्ते
वरयुवतिजनमोहनतनुरिह शुभदति विततवसन्ते विलसति ॥ १॥

कुसुमशरासनशबरनिषूदितकुपितवधूधृतमाने
धनरसकुङ्कुमपङ्कविलेपनविटजनकुतुकविधाने विलसति ॥ २॥

कुसुमितबालरसालमनोहरकिसलयमदनकृपाणे
मधुकरमिथुनपरस्परमधुरसपाननियोगधुरीणे विलसति ॥ ३॥

मदनमहीपतिशुभकरमन्त्रजपायितमधुकरघोषे
अविरलकुसुममरन्दकृताभिनिषेचनतरुमुनिपोषे विलसति ॥ ४॥

मदननिदेशनिवृत्तकलेवरमर्दनमलयसमीरे
तुषितमधुव्रतसञ्चलदतिथिसुपूजनमधुरसपूरे विलसति ॥ ५॥

सुचिरकृतव्रतमौनवनप्रियमुनिजनवागनुकूले
ललितलतागृहविहृतिकृतश्रमयुवतिसुखानिलशीले विलसति ॥ ६॥

विषमशरावनिपालरथायितमृदुलसमीरणजाले
विरहिजनाशयमोहनभसितपरागविजृम्भणकाले विलसति ॥ ७॥

श्रीशिवपूजनयतमति चन्द्रशिखामणियतिवरगीतं
श्रीशिवचरणयुगस्मृतिसाधकमुदयतु वन्यवसन्तं विलसति ॥ ८॥

श्लोकः
विकचकमलकम्पाशैवलिन्यास्तरङ्गैः
अविरलपरिरम्भः सम्भ्रमन् मञ्जरीणाम् ।
परिसररसरागैर्व्याप्तगात्रानुलेपो
विचरति कितवोऽयं मन्दमन्दं समीरः ॥ ९॥

## ॥ द्वितीयः सर्गः ॥

श्लोकः
प्रगल्भतरभामिनी शिवचरित्र गानामृत-
प्रभूतनवमञ्जरीसुरभिगन्धिमन्दानिले ।
रसालतरुमूलगस्फुरितमाधवी मण्डपे
महेशमुपदर्शयन्त्यसकृदाह गौरीमसौ ॥

॥ चतुर्थाष्टपदी ॥

रामक्रियारागेण आदितालेन गीयते
(चन्दनचर्चित इतिवत्)
अविरल कुङ्कुमपङ्ककरम्बितमृगमदचन्द्रविलेपं
निटिल विशेषकभासुरवह्निविलोचन कृतपुरतापं
शशिमुखि शैलवधूतनये विलोकय हरमथ केलिमये शशिमुखि ॥ १॥

युवतिजनाशयमदनशरायितशुभतरनयन विलासं
भुवनविजृम्भितघनतरतिमिरनिषूदननिजतनु भासं शशिमुखि ॥ २॥

पाणि सरोजमृगीपरिशङ्कितबालतृणालिगलाभं
यौवतहृदयविदारणपटुतरदरहसितामितशोभं शशिमुखि ॥ ३॥

चरणसरोजलसन्मणिनूपुरघोषविवृतपदजातं
गगनधुनीसमतनुरुचिसंहतिकारितभुवनविभातं शशिमुखि ॥ ४॥

निखिलवधूजनहृदयसमाहृतिपटुतरमोहनरूपं
मुनिवरनिकरविमुक्तिविधायकबोधविभावनदीपं शशिमुखि ॥ ५॥

विकचसरोरुहलोचनसकृदवलोकनकृतशुभजातं
भुजगशिरोमणिशोणरुचा परिभीतमृगीसमुपेतं शशिमुखि ॥ ६॥

रजतमहीधरसदृशमहावृषदृष्टपुरोवनिभागं
सनकसनन्दनमुनिपरिशोभितदक्षिणतदितरभागं शशिमुखि ॥ ७॥

श्रीशिवपरिचरणव्रतचन्द्रशिखामणि नियमधनेन
शिवचरितं शुभगीतमिदं कृतमुदयतु बोधघनेन शशिमुखि ॥ ८॥

श्लोकः
मदनकदनशान्त्यै फुल्लमल्ली प्रसूनैः
    विरचितवरशय्यामाप्नुवन्निन्दुमौलिः ।
मृदुमलयसमीरं मन्यमानः स्फुलिङ्गान्
    कलयति हृदये त्वामन्वहं शैल कन्ये ॥ १२॥

इति सहचरीवाणीमाकर्ण्य सापि सुधाझरीं
    अचलदुहिता नेतुः श्रुत्वाभिरूप्यगुणोदयम् ।
विरहजनितामार्तिं दूरीचकार हृदि स्थितां
    दयितनिहितप्रेमा कामं जगाद मिथः सखीम् ॥ १३॥

॥ पञ्चमाष्टपदी ॥

तोडिरागेण चापुतालेन गीयते
(सञ्चरदधर इतिवत्)
जलरुहशिखरविराजितहिमकरशङ्कितकरनखराभं
रुचिररदनकिरणामरसरिदिव शोणनदाधर शोभं

सेवे निगमरसालनिवासं - युवतिमनोहरविविधविलासं सेवे ॥ १॥

शुभतनुसौरभलोभविभूषणकैतवमहित भुजङ्गं
मुकुटविराजितहिमकरशकलविनिर्गलदमृतसिताङ्गं सेवे ॥ २॥

मकुटपरिभ्रमदमरधुनीनखविक्षतशङ्कित चन्द्रं
उरसि विलेपितमलयजपङ्कविमर्दितशुभतरचन्द्रं सेवे ॥ ३॥

पन्नगकर्णविभूषणमौलिगमणिरुचि शोणकपोलं
अगणितसरसिजसम्भवमौलिकपालनिवेदित कालं सेवे ॥ ४॥

हरिदनुपालसुरेशपदोन्नतिमुपनमतो वितरन्तं
अनवधिमहिमचिरन्तनमुनिहृदयेषु सदा विहरन्तं सेवे ॥ ५॥

नारदपर्वतवरमुनिकिन्नरसन्नुत वैभव जातं
अन्धकसुररिपुगन्धसिन्धुर विभङ्गमृगादिपरीतं सेवे ॥ ६॥

विषयविरतविमलाशयकोशमहाधनचरणसरोजं
घनतरनिजतनुमञ्जुलतापरि निर्जितनियुत मनोजं सेवे ॥ ७॥

श्रीशिव भजन मनोरथचन्द्रशिखामणियतिवरगीतं
श्रोतुमुदञ्चितकौतुकमविरतममरवधूपरि गीतं सेवे ॥ ८॥

श्लोकः
सहचरि मुखं चेतः प्रातः प्रफुल्लसरोरुह-
प्रतिममनघं कान्तं कान्तस्य चन्द्रशिखामणेः ।
स्मरति परितोद्दृष्टिस्तुष्टा तदाकृतिमाधुरी-
गतिविषयिणी वाणी तस्य ब्रवीति गुणोदयम् ॥ १४॥

॥ षष्टाष्टपदी ॥

काम्भोजिरागेण त्रिपुटतालेन गीयते
(निभृतनिकुञ्ज इतिवत्)
निखिलचराचरनिर्मितिकौशलभरितचरित्र विलोलं
ललितरसालनिबद्धलतागृहविहरण कौतुक शीलं
कलये कालमथनमधीशं
घटय मया सह घनतरकुचपरिरम्भण केलिकृताशं कलये ॥ १॥

कुवलयसौरभवदनसमीरणवसितनिखिलदिगन्तं

चरणसरोजविलोकनतोऽखिलतापरुजं शमयन्तं कलये ॥ २॥

पटुतरचाटुवचोमृतशिशिरनिवारितमनसिजतापं
तरुणवनप्रियभाषणया सह सादरविहितसुलापं कलये ॥ ३॥

चलितदृगञ्चलमसमशरानिव युवतिजने निदधानं
रहसि रसालगृहं गतया सह सरसविहारविधानं कलये ॥ ४॥

दरहसितद्युतिचन्द्रिकया गतखेद विकारचकोरं
लसदरुणाधरवदनवशीकृतयुवतिजनाशयचोरं कलये ॥ ५॥

मलयजपङ्कविलेपनमुरुतरकुचयुगमाकलयन्तं
कृतकरुषो मम सुतनुलतापरिरम्भणकेळिमयन्तं कलये ॥ ६॥

सुरतरुकुसुमसुमालिकया परिमण्डितचिकुरनिकायं
अलघुपुलककटसीमनि मृगमदपत्रविलेखविधेयं कलये ॥ ७॥

श्रीशिवसेवनचन्द्रशिखामणियतिवरगीतमुदारं
सुखयतु शैलजया कथितं शिवचरितविशेषितसारं कलये ॥ ८॥

श्लोकः
लीलाप्रसूनशरपाशसृणिप्रकाण्ड-
पुण्ड्रेक्षुभासिकरपल्लवमम्बुजाक्षम् ।
आलोक्य सस्मितमुखेन्दुकमिन्दुमौलिं
उत्कण्ठते हृदयमीक्षितुमेव भूयः ॥ १५॥

## ॥ तृतीयः सर्गः ॥

श्लोकः
इति बहु कथयन्तीमालिमालोक्य बालां
अलघुविरहदैन्यामद्रिजामीक्षमाणः ।
सपदि मदनखिन्नः सोमरेखावतंसः
किमपि विरहशान्त्यै चिन्तयामास धीरः ॥ १६॥

॥ सप्तमाष्टपदी ॥

भूपालरागेण त्रिपुटतालेन गीयते
(मामियं चलिता इतिवत्)

श्लोकः
लीलया कलहे गता कपटक्रुधा वनितेयं
मानिनी मदनेन मामपि सन्तनोति विधेयम् ॥

शिव शिव कुलाचलसुता ॥ १॥

तापितो मदनज्वरेण तनूनपादधिकेन
यापयमि कतं नु तद्विरहं क्षणं कुतुकेन शिव शिव ॥ २॥

यत्समागमसम्मदेन सुखी चिरं विहरामि ।
यद्वियोगरुजा न जातु मनोहितं वितनोमि शिव शिव ॥ ३॥

लीलया कुपिता यदा मयि तामथानुचरामि ।
भूयसा समयेन तामनुनीय संविहरामि शिव शिव ॥ ४॥

अर्पितं शिरसि क्रुधा मम हा यदङ्घ्रिसरोजं
पाणिना परिपूजितं बत जृम्भमाणमनोजं शिव शिव ॥ ५॥

दृश्यसे पुरतोऽपि गौरि न दृश्यसे चपलेव ।
नापराधकथा मयि प्रणतं जनं कृपयाव शिव शिव ॥ ६॥

नीलनीरदवेणि किं तव मत्कृतेऽनुनयेन ।
सन्निधेहि न गन्तुमर्हसि मादृशे दयनेन शिव शिव ॥ ७॥

वर्णितं शिवदासचन्द्रशिखामणिश्रमणेन ।
वृत्तमेतदुदेतु सन्ततं ईशितुः प्रवणेन शिव शिव ॥ ८॥

श्लोकः
भुवनविजयी विक्रान्तेषु त्वमेव न चेतरः
तव न कृपणे युक्तं मादृग्विधे शरवर्षणम् ।
मदन यदि ते वैरं निर्यातु भो नियतं पुरा
विहितमहितो नाहं नित्यं तवास्मि निदेशगः ॥ १७॥

मधुकरमयज्याघोषेण प्रकम्पयसे मनः
परभृतवधूगाने कर्णज्वरं तनुषेतराम् ।
कुसुमरजसां वृन्दैरुत्मादयस्यचिरादितः
स्मर विजयसे विश्वं चित्रीयते कृतिरीदृशी ॥ १८॥

चलितललितापाङ्ग श्रेणीप्रसारणकैतवात्

दरविकसितस्वच्छच्छायासितोत्पलवर्षणैः ।
विरहशिखिना दूनं दीनं न मामभिरक्षितुं
यदि न मनुषे जानासि त्वं मदीयदशां ततः ॥ १९॥

शुभदति विचरावः शुभ्रकम्पातटिन्यास्तट
भुवि रमणीयोद्यानकेळिं भजावः ।
प्रतिमुहुरिति चिन्ताविह्वलः शैलकन्यामभि
शुभतरवादः पातु चन्द्रार्धमौलेः ॥ २०॥

## ॥ चतुर्थः सर्गः ॥

श्लोकः
कम्पातीरप्रचुररुचिरोद्यानविद्योतमान-
श्रीमाकन्दद्रुमपरिसर माधवीक्लृप्तशालाम् ।
अध्यासीनं रहसि विरहश्रान्तमश्रान्तकेलिं
वाचं गौरीप्रियसहचरी प्राह चन्द्रावतंसम् ॥ २१॥

॥ अष्टमाष्टपदी ॥

सौराष्ट्ररागेण आदितालेन गीयते
(निन्दति चन्दनं इतिवत्)
या हि पुरा हर कुतुकवती परिहासकथासु विरागिणी
असितकुटिल चिकुरावळि मण्डनशुभतरदाम निरोधिनी
शङ्कर शरणमुपैति शिवामतिहन्ति स शम्बरवैरी
शिव विरहकृशा तव गौरी ॥ १॥

कुसुम शयनमुपगम्य सपदि मदनशरविसरपरिदूना
मलयजरजसि महनलततिमिव कलयति मतिमतिदीना
शिव विरहकृशा तव गौरी ॥ २॥

उरसिरुचिरमणिहारलतागतबलभिदुपलततिनीला
मञ्जुवचनगृहपञ्जरशुकपरिभाषणपरिहृतलीला
शिव विरहकृशा तव गौरी ॥ ३॥

भृशकृतभवदनुभावनयेक्षित भवति विहितपरिवादा
सपदि विहित विरहानुगमनादनुसम्भृतहृदय विषादा

शिव विरहकृशा तव गौरी ॥ ४॥

बालहरिणपरिलीढपदा तदनादरविगत विनोदा
उन्मदपरभृतविरुताकर्णनकर्णशल्यकृतबाधा
शिव विरहकृशा तव गौरी ॥ ५॥

कोकमिथुनबहुकेळिविलोकनजृम्भितमदन विकारा
शङ्करहिमकरशेखर पालय मामिति वदति न धीरा
शिव विरहकृशा तव गौरी ॥ ६॥

दूषितमृगमदरुचिरविशेषक निटिलभसिकृतरेखा
अतनुतनुज्वरकारितया परिवर्जितचन्द्रमयूखा
शिव विरहकृशा तव गौरी ॥ ७॥

श्रीशिवचरणनिषेवणचन्द्रशिखामणियतिवरगीतं
श्रीगिरिजाविरहक्रमवर्णनमुदयतु विनयसमेतं
शिव विरहकृशा तव गौरी ॥ ८॥

श्लोकः
आवासमन्दिरमिदं मनुते मृडानी घोराटवीसदृशमाप्तसखीजनेन ।
ना भाषणानि तनुते नलिनायताक्षी देव त्वया विरहिता हरिणाङ्कमौले ॥

॥ नवमाष्टपदी ॥

बिलहरिरागेण त्रिपुटतालेन गीयते
(स्तनविनिहत इतिवत्)
हिमकरमणिमयदामनिकाय कलयति वह्निशिखामुरसीयं
शैलजा शिव शैलजा विरहे तव शङ्कर शैलजा ॥ १॥

वपुषि पतितघनहिमकरपूरं सन्तनुते हृदि दिवि दुरितारं शैलजा ॥ २॥

उरसि निहितमृदु विततमृणालं पश्यति सपदि विलसदळिनीलं शैलजा ॥ ३॥

सहचरयुवतिषु नयनमनीलं नमितमुखी वितनोति विशालं शैलजा ॥ ४॥

रुष्यति खिद्यति मुहुरनिदानं न प्रतिवक्ति सखीमपि दीनं शैलजा ॥ ५॥

शिव इति शिव इति वदति सकामं पश्यति पशुरिव किमपि ललामं शैलजा ॥ ६॥

सुरतरुविविधफलामृतसारं पश्यति विषमिव भृशमतिघोरं शैलजा ॥ ७॥

यतिवरचन्द्रशिखामणिगीतं सुखयतु साधुजनं शुभगीतं शैलजा ॥ ८॥

श्लोकः

त्वद्भावनैकरसिकां त्वदधीनवृत्तिं
    त्वन्नामसंस्मरणसंयुतचित्तवृत्तिम् ।
बालामिमां विरहिणीं कृपणैकबन्धो
    नोपेक्षसे यदि तदा तव शङ्कराख्या ॥ २३॥

वस्तूनि निस्तुलगुणानि निराकृतानि
    कस्तूरिकारुचिरचित्रकपत्रजातम् ।
ईदृग्विधं विरहिणी तनुते मृडानी
    तामाद्रियस्व करुणाभरितैरपाङ्गैः ॥ २४॥

## ॥ पञ्चमः सर्गः ॥

श्लोकः

एकाम्रमूलविलसन्नवमञ्जरीक
श्रीमाधवीरुचिरकुञ्जगृहेवसामि ।
तामानयानुनय मद्वचनेन गौरीमित्थं
शिवेन पुनराह सखी नियुक्ता ॥

॥ दशमाष्टपदी ॥

आनन्दभैरवीरागेण      आदितालेन गीयते
(वहति मलयसमीरे इतिवत्)
जयति मदननृपाले शिवे कुपितपथिक जालं
भ्रमरमिथुन जाले शिवे पिबति मधु सलीलं
विरहरुजा पुरवैरी परिखिद्यति गौरी शिवविरहरुजा ॥ १॥

मलयमरुति वलमाने शिवे विरह विघटनाय
सति च मधुपगाने शिवे सरसविहरणाय शिव विरहरुजा ॥ २॥

कुसुमभरितसाले शिवे विततसुमधुकाले
कृपणविरहिजाले शिवे कितवहृदनुकूले शिवविरहरुजा ॥ ३॥

मदनविजयनिगमं शिवे जपति पिकसमूहे
चतुरकितवसङ्ग (शिवे) कुटिलरवदुरूहे शिवविरहरुजा ॥ ४॥

कुसुमरजसि भरिते शिवे कितवमृदुळमरुता
दिशि च विदिशि वितते शिवे विरहिवपुषि चरता शिवविरहरुजा ॥ ५॥

विमलतुहिनकिरणे शिवे विकिरति करजालं
विहृतिविरतिहरणे शिवे वियति दिशि विशालं शिवविरहरुजा ॥ ६॥

मृदुलकुसुमशयने शिवे वपुषि विरहदूने
भ्रमति लुठति दीने शिवे सुहितशरणहीने शिवविरहरुजा ॥ ७॥

जयति गिरिशमतिना शिवे गिरिशविरहकथनं
चन्द्रमकुटयतिना शिवे निखिलकलुषमथनं शिवविरहरुजा ॥ ८॥

श्लोकः
यत्रत्वामनुरञ्जयन्नतितरामारब्धकामागमं
व्यापारैरचलाधिराजतनये केलीविशेषैर्युतः ।
तत्र त्वामनुचिन्तयन्नथ भवन्नामैकतन्त्रं जपन्
भूयस्तत्परितम्भसम्भ्रमसुखं प्राणेश्वरः काङ्क्षति ॥ २६॥

॥ एकादशाष्टपदी ॥

केदारगौळरागेण आदितालेन गीयते
(रतिसुखसारे गतमभिसारे इतिवत्)
हिमगिरितनये गुरुतरविनये नियुतमदनशुभरूपं
निटिलनयनमनुरञ्जय सति तव विरहजनितघनतापम् ।
मलयजपवने कम्पानुवने वसति सुदति पुरवैरी
युवतिहृदयमदमर्दनकुशली सम्भृत केलिविहारी । मलयजपवने ॥ १॥

वद मृदु दयिते मम हृदि नियते बहिरिव चरसि समीपं
वदति मुहुर्मुहुरिति हर मामकदेहमदनघनतापम् । मलयजपवने ॥ २॥

उरुघन सारं हिमजल पूरं वपुषि पतितमतिघोरं
सपदि न मृष्यति शपति मनोभवमतिमृदुमलय समीरम् ।
मलयजपवने ॥ ३॥

विलिखति चित्रं तव च विचित्रं पश्यति सपदि समोदं
वदति झटिति बहु मामिति शम्बररिपुरतिकलयति खेदम् ।
मलयजपवने ॥ ४॥

अर्पयनीलं मयि धृतलीलं नयनकुसुममतिलोलं
विरहतरुणि विरहातुरमनुभज मामिह (ति) विलपति सा (सोऽ) लम् ।
मलयजपवने ॥ ५॥

लसदपराधं मनसिजबाधं विमृश विनेतुमुपायं
गुरुतरतुङ्गपयोधरदुर्गमपानय हरमनपायम् । मलयजपवने ॥ ६ ॥

अतिधृतमाने परभृतगाने किञ्चिदुदञ्चय गानं
जहि जहि मानमनूनगुणै रमयाशु विरहच्चिरदीनम् । मलयजपवने ॥ ७॥

इति शिवविरहं घनतरमोहं भणति नियमिजनधीरे
चन्द्रशिखामणिनामनि कुशलमुपनय गजवरचीरे । मलयजपवने ॥ ८॥

श्लोकः
विमल सलिलोदञ्चत्कम्पासरोरुहधोरणी-
परिमलरजः पालीसङ्क्रान्तमन्दसमीरणे ।
वितपति वियद्गङ्गामङ्गीचकार शिरः स्थितां
तव हि विरहाक्रान्तः कान्तः नतोऽपि न वेदितः ॥ २७॥

अनुभवति मृगाक्षी त्वद्वियोगक्षणानां
लवमिव युगकल्पं स्वल्पमात्मापराधम् ।
त्वयि विहितमनल्पं मन्यमानः कथञ्चित्
नयति समयमेनं देवि तस्मिन्प्रसीद ॥ २८॥

इति सहचरीवाणीमेणाङ्कमौळिमनोभव-
व्यथनकथनीमेनामाकर्ण्य कर्णसुधाझरीम् ।
सपदि मुदिता विन्यस्यन्ती पदानि शनैः शनैः
जयति जगतां माता नेतुः प्रविश्य लतागृहम् ॥ २९॥

सा दक्षदेवनविहारजयानुषङ्गलीलाहवे भवति शैलजया शिवस्य ।
चेतः प्रसादमनयोस्तरसा विधाय देव्या कृतं कथयति स्म सखी रहस्यम् ॥ ३०॥

॥ द्वादशाष्टपदी ॥

शङ्कराभरणरागेण त्रिपुटतालेन गीयते
(पश्यति दिशि दिशि इतिवत्)
कलयति कलयति मनसि चरन्तं
कुचकलशस्पृशमयति भवन्तम् ।

पाहि विभो शिव पाहि विभो
निवसति गौरी केळिवने पाहि विभो ॥ १॥

जपति जपति तव नाम सुमन्त्रं
प्रति मुहुरुदितसुमायुधतन्त्रं पाहि ॥ २॥

उपचितकुसुमसुदामवहन्ती
भवदनुचिन्तनमाकलयन्ती पाहि ॥ ३॥

मलयजरजसि निराकृतरागा
वपुषि भसित धृतिसंयतयोगा पाहि ॥ ४॥

परिहृतवेणि जटाकच भारा
निजपतिघटकजनाशयधारा पाहि ॥ ५॥

अविधृतमणिमुकुटादिललामा
बिसवलयादिविधारणकामा पाहि ॥ ६॥

मुहुरवलोकित किसलयशयना
बहिरुपसङ्गत सुललित नयना पाहि ॥ ७॥

इति शिव भजनगुणेन विभान्तं
चन्द्रशिखामणिना शुभगीतम् ॥ पाहि ॥ ८॥

श्लोकः
सा वीक्षते सहचरीं मदनेन लज्जा-
भारेण नोत्तरवचो वदति प्रगल्भा ।
व्याधून्वति श्वसितकोष्णसमीरणेन
तुङ्गस्तनोत्तरपटं गिरिजा वियुक्ता ॥ ३१॥

## ॥ षष्ठः सर्गः ॥

श्लोकः
अथ विरहिणीमर्मच्छेदानुसम्भृतपातक-
श्रित इव निशानाथः सङ्क्रान्तनीलगुणान्तरः ।
किरणनिकरैरञ्चत्कम्पासरित्तटरम्यभू-
वलयमभितो व्याप्त्या विभ्राजयन्परिजृम्भते ॥ ३२॥

विकिरति निजकरजालं हिमकरबिम्बेऽपि नागते कान्ते ।
अकृतकमनीयरूपा स्वात्मगतं किमपि वदति गिरिकन्या ॥ ३३॥

॥ त्रयोदशाष्टपदी ॥

आहिरिरागेण झम्पतालेन गीयते
(कथितसमयेऽपि इतिवत्)
सुचिरविरहापनय सुकृतभिकामितं
सफलयति किमिह विधिरुत न विभवामितं
कामिनी किमिह कलये सहचरीवञ्चिताहं कामिनी ॥ १॥

यदनुभजनेन मम सुखमखिलमायतं
तमनुकलये किमिह नयनपथमागतं कामिनी ॥ २॥

येन मलयजरेणुनिकरमिदमीरितं
न च वहति कुचयुगलमुरु तदवधीरितुं कामिनी ॥ ३॥

यच्चरणपरिचरणमखिलफलदायकं
न स्पृशति मनसि मम हा तदुपनायकं कामिनी ॥ ४॥

निगमशिरसि स्फुरति यतिमनसि यत्पदम् ।
विततसुखदं तदपि हृदि न मे किमिदं कामिनी ॥ ५॥

विरहसमयेषु किल हृदि यदनुचिन्तनम् ।
न स भजति नयनपथमखिलभय कृन्तनं कामिनी ॥ ६॥

कुचयुगलमभिमृशति स यदि रतसूचितम् ।
सफलमिह निखिलगुणसहितमपि जीवितं कामिनी ॥ ७॥

नियमधनविधुमौळिफणितमिदमञ्चितम् ।
बहुजनिषु कलुषभयमपनयतु सञ्चितं कामिनी ॥ ८॥

श्लोकः
आजग्मुषीं सहचरीं हरमन्तरेण
चिन्ताविजृम्भितविषादभरेण दीना ।
आलोक्य लोकजननी हृदि सन्दिहाना
कान्तं कयाभिरमितं निजगाद वाक्यम् ॥ ३४॥

॥ चतुर्दशाष्टपदी ॥

सारङ्गरागेण त्रिपुटतालेन गीयते
(स्मरसमरोचित इतिवत्)
कुसुमशराहवसमुचितरूपा प्रियपरिरम्भणपरिहृततापा
कापि पुररिपुणा रमयति हृदयममितगुणा कापि ॥ १॥

घनतरकुचयुगमृगमदलेपा
दयितविहितरतिनव्यसुलापा ॥ कापि ॥ २॥

रमणरचितकटपत्रविशेषा
उरसिलुलितमणिहारविभूषा ॥ कापि ॥ ३॥

दयितनिपीतसुधाधरसीमा
गलितवसनकटिपरिहृतदामा ॥ कापि ॥ ४॥

अधिगतमृदुतरकिसलयशयना
दरपरिमीलितचालितनयना ॥ कापि ॥ ५॥

विहितमधुररतिकूजितभेदा
दृढपरिरम्भणहतमेति भेदा ॥ कापि ॥ ६॥

महित महोरसि सरभसपतिता
लुलितकुसुमकुटिलालकमुदिता ॥ कापि ॥ ७॥

चन्द्रशिखामणियतिवरभणितम् ।
सुखयतु साधुजनं शिवचरितम् ॥ कापि ॥ ८॥

## ॥ सप्तमः सर्गः ॥

श्लोकः
चकोराणां प्रीतिं कलयसि मयूखैर्निजकला-
प्रदानैर्देवानमपि दयितभाजां मृगदृशाम् ।
न कोकानां राकाहिमकिरण मादृग्विरहिणी-
जनानां युक्तं ते किमिदमसमं हन्त चरितम् ॥ ३५॥

गङ्गामङ्गनिषङ्गिपङ्कजरजोगन्धावहामङ्गनां
आश्लिष्यन्निभृतं निरङ्कुशरहः केळीविशेषैरलम् ।
विभ्रान्तः किमदभ्ररागभरितस्तस्यामुत स्यादयं

कान्तोऽश्रान्तमनङ्गनागविहतो नाभ्याशमभ्यागतः ॥ ३६॥

सन्तापयन्नखिलगात्रममित्रभावात्
सन्दृश्यते जडधियामिह शीतभानुः ।
दोषाकरो वपुषि सङ्गतराजयक्ष्मा
घोराकृतिर्हि शिवदूति निशाचराणाम् ॥ ३७॥

॥ पञ्चदशाष्टपदी ॥

सावेरिरागेण आदितालेन गीयते
(समुदितवदने इतिवत्)
विरहितशरणे रमणीचरणे विजितारुणपङ्कजे
अरुणिमरुचिरं कलयति सुचिरं मतिमिव वपुषि निजे
रमते कम्पामहितवने विजयी पुरारिजने ॥ रमते ॥ १॥

अलिकुलवलिते परिमळललिते युवतिकुटिलालके
कलयति कुसुमं विलसितसुषुमं सुमशरपरिपालके ॥ रमते ॥ २॥

कुचगिरियुगले निजमतिनिगले मृगमदरचनाकरे
मणिसरनिकरं विलसितमुकुरं घटयति सुमनोहरे ॥ रमते ॥ ३॥

विलसितरदने तरुणीवदने किसलयरुचिराधरे
रचयति पत्रं मकरविचित्रं स्मितरुचिपरिभासुरे ॥ रमते ॥ ४॥

कटितटभागे मनसिजयोगे विगळितकनकाम्बरे
मणिमयरशनं रविरचिवसनं घटयति तुहिनकरे ॥ रमते ॥ ५॥

अधरसुधाळिं रुचिररदालिं पिबति सुमुखशङ्करे
विदधति मधुरं हसति च विधुरं रतिनिधिनिहितादरे ॥ रमते ॥ ६॥

मृदुलसमीरे वलति गभीरे विलसति तुहिनकरे
उदितमनोजं विकसदुरोजं शिवरतिविहितादरे ॥ रमते ॥ ७॥

इति रसवचने शिवनति रचने पुरहरभजनादरे
बहुजनिकलुषं निरसतु परुषं यतिवरविधुशेखरे ॥ रमते ॥ ८॥

श्लोकः
आयातवानिह न खेदपरानुषङ्ग-
वाञ्छाभरेण विवशस्तरुणेन्दुमौलिः ।

स्वच्छन्दमेव रमतां तव कोऽत्र दोषः
पश्याचिरेण दयितं मदुपाश्रयस्थम् ॥ ३८॥

## ॥ अष्टमः सर्गः ॥

श्लोकः
मत्प्राणनेतुरसहायरसालमूल-
लीलागृहस्य मयि चेदनुरागबन्धः ।
अन्याकथानुभविनः प्रणयानुबन्धो
दूति प्रसीदति ममैष महानुभावः ॥

॥ षोडशाष्टपदी ॥

पुन्नागवराली रागेण आदितालेन गीयते
(अनिलतरलकुवलयनयनेन इतिवत्)
अरुणकमलशुभतरचरणेन सपदि गता न हि भवतरणेन ।
या विहृता पुरवैरिणा ॥ १॥

स्मितरुचिहिमकरशुभवदनेन निहितगुणा विलसितसदनेन ।
या विहृता पुरवैरिणा ॥ २॥

सरसवचनजितकुसुमरसेन हृदि विनिहितरतिकृतरभसेन ।
या विहृता पुरवैरिणा ॥ ३॥

विहित विविधकुसुमशरविहृते नानागतरसा नयगुण विहितेन ।
या विहृता पुरवैरिणा ॥ ४॥

उदितजलजरुचिरगळेन स्फुटितमना न युवतिनिगळेन ।
या विहृता पुरवैरिणा ॥ ५॥

कनकरुचिरसुजटापटलेनानुहतसुखासतिलकनिटिलेन ।
या विहृता पुरवैरिणा ॥ ६॥

निखिलयुवतिमदनोदयनेन ज्वरितमाना न विरहदहनेन ।
या विहृता पुरवैरिणा ॥ ७॥

तुहिनकिरणधरयतिरचनेन सुखयतु मां शिवहितवचनेन ।
या विहृता पुरवैरिणा ॥ ८॥

श्लोकः

अयि मलयसमीर क्रूर भावोरगाणां
श्वसितजनित किं ते मादृशीहिंसनेन ।
क्षणमिव सहकारादीशगात्रानुषङ्ग-
उपहृतपरिमलात्मा सन्निधेहि प्रसन्नः ॥ ४० ॥

## ॥ नवमः सर्गः ॥

श्लोकः

इत्थं रुषा सहचरीं परुषं वदन्ती
शैलाधिराजतनुजा तनुजातकार्श्या ।
नीत्वा कथं कथमपि क्षणदां महेशः
मागः प्रशान्ति विनतं कुटिलं बभाषे ॥ ४१ ॥

॥ सप्तदशाष्टपदी ॥

आरभीरागेण त्रिपुटतालेन गीयते
(रजनिजनितगुरु इतिवत्)

चतुरयुवतिसुरतादर जागरितारुणमधृतविलासं
निटिलनयन नयनद्वितयं तव कथयति तदभिनिवेशम् ।
पाहि तामिह भाललोचन या तव दिशति विहारं
गरळमिलितधवलामृतमिव हरमागमवचनमसारं पाहि ॥

गुरुतरकुचपरिरम्भणसम्भृतकुङ्कुमपङ्किलहारं
स्मरति विशालमुरो विशदं तव रतिरभसादनुरागं पाहि ॥ २ ॥

रतिपतिसमरविनिर्मित निशितनखक्षतचिह्नितरेखं
वपुरिदमळिकविलोचन लसदिव रतिभरकृतजयरेखं पाहि ॥ ३ ॥

रदनवसनमरुणमिदं तव पुरहर भजति विरागं
विगलितहिमकरशकलमुदञ्चितदर्शितरतिभरवेगं पाहि ॥ ४ ॥

युवतिपदस्थितयावकरसपरिचिन्तितरतिकमनीयं
विलसति वपुरिदमलघुबहिर्गतमयति विरागममेयं पाहि ॥ ५ ॥

युवतिकृतव्रणमधरगतं तव कलयति मम हृदि रोषं
प्रियवचनावसरेऽपि मया सह स्फुटयति तत्परितोषं पाहि ॥ ६ ॥

सुरतरुसुमदामनिकायनिबद्धजटावलिवलयमुदारं
कितवमनोभवसङ्गरशिथिलितमनुकथयति सुविहारं पाहि ॥ ७॥

इति हिमगिरिकुलदीपिकया कृतशिवपरिवदनविधानं
सुखयतु बुधजनमीशनिषेवणयतिवरविधुशेखरगानं पाहि ॥ ८॥

श्लोकः
ईदृग्विधानि सुबहूनि तव प्रियायां
गाढानुरागकृतसङ्गमलाञ्छितानि ।
साक्षद्वेक्षितवतीमिह मामुपेत्य
किं भाषसे कितवशेखर चन्द्रमौळे ॥ ४२

## ॥ दशमः सर्गः ॥

श्लोकः
तामुद्यतप्रसवबाणविकारखिन्नां
सञ्चिन्त्यमानशशिमौलिचरित्रलीलाम् ।
बालां तुषारगिरिजां रतिकेलिभिन्नां
आळिः प्रियाथ कलहान्तरितामुवाच ॥ ४३॥

॥ अष्टादशाष्टपदी ॥

यदुकुलकाम्भोजिरागेण आदितालेन गीयते
(हरिरभिसरति इतिवत्)
पुररिपुरभिरतिमति हृदि तनुते
भवदुपगूहनमिह बहु मनुते ।
शङ्करे हे शङ्करि मा भज
मानिनि परिमानमुमे शङ्करे ॥ १॥

मृगमदरसमय गुरुकुचयुगले
कलयति पुररिपुरथ मति निगले ॥ शङ्करे ॥ २॥

सुचिरविरहभवमपहर कलुषं
भवदधरामृतमुपहर निमिषम् ॥ शङ्करे ॥ ३॥

सरस निटिलकृतचित्रकरुचिरं

तव वदनं स च कलयति सुचिरम् ॥ शङ्करे ॥ ४॥

विभुरयमेष्यति शुभतरमनसा
तदुरसि कुचयुगमुपकुरु सहसा ॥ शङ्करे ॥ ५॥

सकुसुमनिकरमुदञ्चय चिकुरं
सुदति विलोकय मणिमय मुकुरम् ॥ शङ्करे ॥ ६॥

शृणु सखि शुभदति मम हितवचनं
घटय जघनमपि विगलितरशनम् ॥ शङ्करे ॥ ७॥

श्रीविधुशेखरयतिवरफणितं
सुखयतु साधुजनं शिवचरितम् ॥ शङ्करे ॥ ८॥

महादेवे तस्मिन्प्रणमति निजागः शमयितुं
तदीयं मूर्धानं प्रहरसि पदाभ्यां गिरिसुते ।
स एष क्रुद्धश्चेत्तुहिनकिरणं स्थापयति चेत्
मृदून्यङ्गान्यङ्गारक इव तनोत्येष पवनः ॥ ४४॥

## ॥ एकादशः सर्गः ॥

इत्थं प्रियां सहचरीं गिरमुद्गिरन्तीं
चिन्ताभरेण चिरमीक्षितुमप्यधीरा ।
गौरी कथञ्चिदभिमानवती ददर्श
कान्तं प्रियानुनयवाक्य मुदीरयन्तम् ॥ ४५॥

बाले कुलाचलकुमारि विमुञ्च रोषं
दोषं च मय्यधिगतं हृदये न कुर्याः ।
शक्ष्यामि नैव भवितुं भवतीं विनाहं
वक्ष्यामि किं तव पुरः प्रियमन्यदस्मात् ॥ ४६॥

॥ एकोनविंशाष्टपदी ॥

मुखारि रागेण झम्पतालेन गीयते
(वदसि यदि किञ्चिदपि इतिवत्)
भजसि यदि मयि रोषमरुणवारिरुहाक्षि
किमिह मम शरणमभिजातं

शरणमुपयायतवति कलुषपरिभावनं
न वरमिति सति सुजनगीतं शिवे शैलकन्ये
पञ्चशरतपनमिह जातं
हरकमलशीतलं सरसनयनाञ्चलं
मयि कलय रतिषु कमनीयं शिवे शैलकन्ये ॥ १॥

स्पृशसि यदि वपुररुणकमलसमपाणिना
न स्पृशसि तपनमनिवारं
दरहसितचन्द्रकरनिकरमनुषञ्जयसि
यदि मम च हृदयमतिधीरं  शिवे शैलकन्ये ॥ २॥

कुसुमदामचयेन मम जटावलिजूटनिचयमयि सुदति सविलासं
सपदि कलयामि वलयाकृतिसरोजवनसुरसरितमुपहसितभासम्
शिवे शैलकन्ये ॥ ३॥

अमलमणिहारनिकरेण परिभूषयसि
पृथुल कुचयुगल मतिभारम् ।
तुहिनगरिशिखरानुगळितसुरनिम्नगा
सुगळसमभावसुगभीरम्  शिवे शैलकन्ये ॥ ४॥

विकसदसिताम्बुरुहविमलनयना-
ञ्चलैरुपचरसि विरहपरिदूनम् ।
सफलमिह जीवितं मम सुदति कोपने
विसृज मयि सफलमतिमानम्  शिवे शैलकन्ये ॥ ५॥

भवदधर मधु वितर विषमशरविकृति-
हरमयि वितर रतिनियतभानं
स्फुयमदपराधशतमगणनीयमिह
विमृश भवदनुसृतिविधानं शिवे शैलकन्ये ॥ ६॥

कुपितहृदयासि मयि कलय भुजबन्धने
कुरु निशितरदनपरिपातं
उचितमिदमखिलं तु नायिके सुदति मम
शिक्षणं स्वकुचगिरिपातं शिवे शैलकन्ये ॥ ७॥

इति विविधवचनमपि चतुरपुरवैरिणा
हिमशिखरिजनुषमभिरामं

शिवभजननियतमतियतिचन्द्रमौलिना
फणितमपि जयतु भुवि कामं  शिवे शैलकन्ये ॥ ८॥

श्लोकः
सुचिर विरहाक्रान्तं विभ्रान्तचित्तमितस्ततः
    स्मरपरवशं दीनं नोपेक्षसे यदि मां प्रिये ।
अहमिह चिरं जीवन्भावत्कसेवनमाद्रिये
    यदपकरणं सर्वं क्षन्तव्यमद्रिकुमारिके ॥ ४७॥

## ॥ द्वादशः सर्गः ॥

श्लोकः
इति विरहितामेनां चेतः प्रसादवतीं शिवां
    अनुनयगिरां गुम्फैः सम्भावयन्निजपाणिना ।
झटिति घटयन्मन्दस्मेरस्तदीयकराम्बुजं
    हिमकरकलामौलिः संप्राप केलिलतागृहम् ॥ ४८॥

संप्राप्य केळीगृहमिन्दुमौलिः इन्दीवराक्षीमनुवीक्षमाणः ।
जहौ रहः केलिकुतूहलेन वियोगजार्तिं पुनराबभाषे ॥ ४९॥

॥ विंशाष्टपदी ॥

घण्टारागेण        झम्पतालेन गीयते
(मञ्जुतरकुञ्जतल इतिवत्)
पृथुलतरललितकुचयुगलमयि ते
मृगमदरसेन कलयामि दयिते ।
रमय बाले भवदनुगमेनम् ॥ रमय बाले ॥ १॥

विधुशकलरुचिरमिदमलिकमयि ते
शुभतिलकमभिलसतु केलिनियते ॥ रमय बाले ॥ २॥

इह विहर तरुणि नव कुसुमशयने
भवदधरमधु वितर मकरनयने ॥ रमय बाले ॥ ३॥

अयि सुचिरविरहरुजमपहर शिवे
सरसमभिलप रमणि परभृतरवे ॥ रमय बाले ॥ ४॥

कलय मलयजपङ्कमुरसि मम ते
कठिनकुचयुगमतनु घटय ललिते ॥ रमय बाले ॥ ५॥

इदममरतरुकुसुमनिकरमयि ते
घनचिकुरमुपचरतु सपदि वनिते ॥ रमय बाले ॥ ६॥

दरहसितविधुकरमुदञ्चय मनो-
भवतपनमपनुदतु विलसितघने ॥ रमय बाले ॥ ७॥

शिवचरणपरिचरणयतविचारे
फणति हिमकरमौळिनियमिधीरे ॥ रमय बाले ॥ ८॥

श्लोकः
ईदृग्विधैश्चटुलचाटुवचोविलासैः
 गाढोपगूहनमुखाम्बुजचुम्भनाद्यैः ।
आह्लादयन् गिरिसुतामधिकाञ्चि नित्यं
 एकाम्रमूलवसतिर्जयति प्रसन्नः ॥ ५०॥

विद्याविनीतजयदेवकवेरुदार-
 गीतिप्रबन्धसरणिप्रणिधानमात्रात् ।
एषा मया विरचिता शिवगीतिमाला
 मोदं करोतु शिवयोः पदयोजनीया ॥ ५१॥

अव्यक्तवर्णमुदितेन यथार्भकस्य
 वाक्येन मोदभरितं हृदयं हि पित्रोः ।
एकाम्रनाथ भवदङ्घ्रिसमर्पितेयं
 मोदं करोतु भवतः शिवगीतिमाला ॥ ५२॥

गुणानुस्यूतिरहिता दोषग्रन्थिविदूषिता ।
तथापि शिवगीतिर्नो मालिका चित्रमीदृशी ॥ ५३॥

ॐ नमः शिवायै च नमः शिवाय

इति श्रीचन्द्रशेखरेन्द्रसरस्वतीविरचिता शिवगीतिमाला
अथवा शिवाष्टपदी समाप्ता ।

॥ शुभमस्तु ॥

Siva Gitimala Siva Ashtapadi

Encoded and proofread by P.R. Kannan prkannanvashi at yahoo.com

*Sivagitimala or Sivashtapadi*

pdf was typeset on June 29, 2023

Please send corrections to *sanskrit@cheerful.com*